# rAdhAkRiShNayugalastutiH

# રાધાકૃષ્ણયુગલસ્તુતિઃ

## Document Information

Text title : rAdhAkRiShNayugalastutiH from Gargasamhita

File name : rAdhAkRiShNayugalastutiHgargasamhitA.itx

Category : vishhnu, krishna, stotra, vishnu

Location : doc_vishhnu

Transliterated by : Vishwas Bhide vrbhide at rediffmail.com

Proofread by : Vishwas Bhide, PSA Easwaran

Description-comments : gargasamhitA

Acknowledge-Permission: Vishwas Bhide http://satsangdhara.net/

Latest update : February 3, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# rAdhAkRiShNayugalastutiH

# રાધાકૃષ્ણયુગલસ્તુતિઃ

શ્રીબ્રહ્મોવાચ -
અનાદિમાદ્યં પુરુષોત્તમોત્તમં શ્રીકૃષ્ણચન્દ્રં નિજભક્તવત્સલમ્ ।
સ્વયં ત્વસઙ્ખ્યાણ્ડપતિં પરાત્પરં રાધાપતિં ત્વાં શરણં વ્રજામ્યહમ્ ॥ ૧॥

ગોલોકનાથસ્ત્વમતીવ લીલો લીલાવતીયં નિજલોકલીલા ।
વૈકુણ્ઠનાથોઽસિ યદા ત્વમેવ લક્ષ્મીસ્તદેયં વૃષભાનુજા હિ ॥ ૨॥

ત્વં રામચન્દ્રો જનકાત્મજેયં ભૂમૌ હરિસ્ત્વં કમલાલયેયમ્ ।
યજ્ઞાવતારોઽસિ યદા તદેયં શ્રીદક્ષિણા સ્ત્રી પ્રતિપત્નિમુખ્યા ॥ ૩॥

ત્વં નારસિંહોઽસિ રમા તદેયં નારાયણસ્ત્વં ચ નરેણ યુક્તઃ ।
તદા ત્વિયં શાન્તિરતીવ સાક્ષાચ્છાયેવ યાતા ચ તવાનુરૂપા ॥ ૪॥

ત્વં બ્રહ્મ ચેયં પ્રકૃતિસ્તટસ્થા કાલો યદેમાં ચ વિદુઃ પ્રધાનામ્ ।
મહાન્યદા ત્વં જગદઙ્કુરોઽસિ રાધા તદેયં સગુણા ચ માયા ॥ ૫॥

યદાન્તરાત્મા વિદિતશ્ચતુર્ભિસ્તદા ત્વિયં લક્ષણરૂપવૃત્તિઃ ।
યદા વિરાડ્દેહધરસ્ત્વમેવ તદાખિલં વા ભુવિ ધારણેયમ્ ॥ ૬॥

શ્યામં ચ ગૌરં વિદિતં દ્વિધા મહસ્તવૈવ સાક્ષાત્પુરુષોત્તમોત્તમ ।
ગોલોકધામાધિપતિં પરેશં પરાત્પરં ત્વાં શરણં વ્રજામ્યહમ્ ॥ ૭॥

સદા પઠેદ્યો યુગલસ્તવં પરં ગોલોકધામપ્રવરં પ્રયાતિ સઃ ।
ઇહૈવ સૌન્દર્યસમૃદ્ધિસિદ્ધયો ભવન્તિ તસ્યાપિ નિસર્ગતઃ પુનઃ ॥ ૮॥

ઇતિ ગર્ગસંહિતાયાં ગોલોકખણ્ડે ષોડશાધ્યાયાન્તર્ગતા
બ્રહ્મણા કૃતા રાધાકૃષ્ણયુગલસ્તુતિઃ સમાપ્તા ।

Garga Samhita, Golokakhanda, Adhaya 16 verses 21-28

Encoded by Vishwas Bhide vrbhide at rediffmail.com http://satsangdhara.net/
Proofread by PSA Easwaran

*rAdhAkRiShNayugalastutiH*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*